RASĀRṆAVĀLAṂKĀRA OF PRAKĀŚAVARMAN ORI MYSORE

श्रीरस्तु

------ पदे वाक्ये अथ वाक्यार्थे दोषवर्गः

------ पूर्वभङ्ग्या तु तत्प्रपञ्चः ------

बध्दं च कष्टं क्लिष्टमनर्थकम्। अपुष्टार्थं च गूढा-
र्थमप्रतीतं ससंक्षयम्। नेयार्थमसमर्थं च यच्चत-
त्राप्रयोजकम्। दो--- मिति स्पष्टं पददोषाश्चतुर्दश।
शब्दशास्त्राविरुध्दं यत्तदसाधु निगद्यते। नप्रयुक्तं
कृतीन्द्रैर्यदनिबध्दं & तदुच्यते। प्र--- चार्यवर्ण-
स्तु कष्टं श्रवणदुर्भगम्। पारंपर्येण चार्थस्य सूच-
कं क्लिष्टमुच्यते। पादपूरणमात्रं यत्तच्च--नर्थ-
कम्। वाच्यतुच्छतयाक्लिष्टमपुष्टार्थं मनीषिभिः
अप्रसिध्दार्थसंबन्धं गूढोक्तिरभिधीयते। शास्त्र-
-- युक्तं यदप्रतीतं तदुच्यते। यत्रार्थान्तरसंब-
न्धस्तत्सन्देहे ससंक्षयम्। स्वयं कल्पितसङ्के-
तं नेयार्थ---च्यते। असमर्थं तु यद्बध्दं रूढि-

वर्गव्यतिक्रमात्। विवक्षितप्रमेयस्य नोपकार्यप्रयो-
जकम्। ... --- थवास्य एकं देशकालादिमतं पदम्।
अपसम्यापक्रमं मताम्यं तथा यच्च क्रमाकरम्। सा-
कांक्षमतिहेतुत्वात् त्रिविधा -- भवेत्। शब्दही-
नं क्रमभ्रष्टं विसन्धि पुनरुक्तिमत्। व्याकीर्णं भि-
न्नवृत्तं च संकीर्णं गर्भितं तथा। विभिन्नलिङ्गव-
चने --जं न्यूनाधिको भवेत्। श्लेषादिगुणहीनं
च वाक्यदोषाश्चतुर्दश। भिन्नभाषापदाविद्धं
शब्दहीनं --कीर्तितम्। शब्दार्थव्युत्क्रमो यत्र
क्रमभ्रष्टं तदिष्यते। विरुद्धसन्धिनिस्सन्धि वि-
सन्धीति निगद्यते। तादृक्पदपदार्थानां निबन्धे
पुनरुक्तिमत्। अनेकपदसन्तानव्याहतस्थितिभिः
पदैः। योजना यत्र तद्वाक्यं व्याकीर्णमभिधीयते।
छन्दोलक्षणहीनं तु भिन्नवृत्तं विदुर्बुधाः। तद्वर्ण-
यतिभेदेन द्विधा तज्ज्ञैरुदाहृतम्। वाक्यान्तरपदो-

न्मिश्रं तत्संकीर्णमिष्यते। वाक्यान्तरसमावेशं य-
द्वाक्यं गर्भितं विदुः। भिन्नलिङ्गमलिङ्गं (व) दुप-
मानोपमेययोः। तद्भिन्नवचनं नाम निबध्नन्ति न
साधवः। क्रियाविरहितं वाक्यं खञ्जमित्यभि-
धीयते। ज्ञेयं न्यूनोपमं न्यूनैरुपमाया विशेषणैः।
विशेषणाधिकौपम्यं विज्ञेयमधिकोपमम्। शब्दा-
र्थोभयभेदेन विप्रथन्ते त्रिधा गुणाः। ---पर्याय-
तो दोषास्त्रिधा वाक्ये व्यवस्थिताः। तत्र शब्दगु-
णाः श्लेषः समता सुकुमारता। अर्थप्रकाशसूचका-
न्तिरिसर्थसंज्ञया। ओजो माधुर्यमौदार्यं समाधि-
श्चोभयात्मकाः। तत्र तच्छिथिलं वाक्य --श्लेषवि-
पर्ययः। विषमं तु वदन्ति यत्र साम्यविपर्ययः।
तत्कठोरं भवेद्यत्र सौकुमार्यविपर्ययः। सन्त शां-
---नयार्थमर्थव्यक्तिविपर्ययः। अप्रसन्नं तदेवा-
हुः यः प्रसादविपर्ययः। अव्युत्पन्नं तमित्याहुः

यत्र कान्तिविपर्ययः॥ ---शब्दार्थयोः प्रौढिरप्रौढि-
स्तद्विपर्ययः। रूढिभङ्गादतिस्पष्टं माधुर्यस्य विप-
र्ययः॥ निरलङ्कार---हुरौदार्यस्य विपर्ययः॥ ऋ-
जुमार्ग इति ज्ञेयो निस्समाधिर्गिरां क्रमः॥ अपा-
र्थं व्यर्थमेकार्थं ---संशयमपक्रमम्। खिन्नं चैवा-
तिमात्रं च विरसं परुषं तथा॥ हीनोपम्याधिकौ-
पम्ये तथाऽसदृशोपमम्। अप्रसिद्धोपमं चैव
निरलंकारमेव च॥ अश्लीलं च विरुद्धं च वाक्या-
र्थे षोडश स्मृताः॥ समुदायार्थशून्यं ---पार्थं प्र-
चक्ष्यते॥ यदप्रयोजनं यत्र गतार्थं व्यर्थमेव च।
उक्ताभिन्नार्थमेकार्थं *माहरन्ति विपश्चि---॥ स-
ंशयं तु यत्प्राकृतार्थस्य न निश्चयः॥ अपक्रमं तु
तद्यत्र पौर्वापर्यविपर्ययः॥ न्यायाद्युक्त---ढं खिन्न-
मित्यभिधीयते। लोकातीतिरिवार्थो यस्सोऽतिमात्र
इष्यते॥ अप्राकृतरसं ज्ञेयं विरसं ---कोविदैः।

अतिक्रूरस्तु वाक्यार्थः परुषो विदुषां मतः॥ हीनं
यत्रोपमानं स्यात् सोऽर्थहीनोपमः स्मृतः।---पमान-
माधिकं तज्ज्ञेयमाधिकोपमम्॥ अतुल्यमुपमानं चेद्भवे-
दसदृशोपमम्। अप्रसिद्धोपमानं चेदप्रसिद्धोप-
मं तु तत्॥ निरलंकारमाहुरलंकारविवर्जितम्।
यदसभ्यार्थसंबद्धं तदश्लीलमुदाहृतम्। प्र---हतं
वस्तु विरुद्धमभिधीयते॥ प्रत्यक्षादिप्रभेदेन त्रिधा
शास्त्रविदो विदुः। प्रत्यक्षव्याहत--लोकविरोध-
कृत॥ युक्त्यौचित्यप्रतिज्ञानां विरोधस्त्वनुमानभूः॥ ध-
र्मार्थकामशास्त्र—विरोधस्त्वागमाद्भवेत्॥ एवं त्र-
यमपि त्रिकालावतां प्रतिपद्यते। तत्र देशविरुद्धं त-
द्यत्र --- यद्भवेत्॥ तच्च लोकविरुद्धं यत्सर्वलोके-
रसंमतम्॥ तत्तु युक्तिविरुद्धं स्याद्यदविचारेण--
न। तदौचित्यविरुद्धं स्यात्पात्रे यत्र भनो---॥
तत्प्रतिज्ञाविरुद्धं स्यात्प्रतिज्ञा येन बाध्यते।

धर्मशास्त्रविरुद्धं यत् ज्ञेयं धर्मविरोधितम्॥ अर्थ-
शास्त्रविरुद्धं तत् ज्ञेयं। नीतिबहिष्कृतम्। कामशास्त्र-
कलाशास्त्रविरुद्धं यन्निबध्यते॥ कामशास्त्रविरो-
धीति तत्सर्वमभिधीयते॥

इति रसार्णवालङ्कारे दोषप्रबोधो नाम प्रथमः
परिच्छेदः॥

निर्दिष्टस्यापि काव्यस्य गुणोपादानमन्तरा। शास्त्रार्थ-
---लोकः साधुत्वं नानुमन्यते॥ नहि कुष्ठादिभिर्दो-
षैः रहितं कामिनीवपुः। नृत्तगीतादिचातुर्यगुणैर्ना--
न्ते क्वचित्॥ तेषु शब्दगुणास्तावद्विंशतिरुदीरि-
ताः। ते च सान्वयनामानो निगद्यन्ते मनीषिभिः॥ श्ले-
षः प्रसादः समता माधुर्यं सुकुमारता। अर्थव्यक्ति-
स्तथा कान्तिरुदारत्वमुदात्तता॥ ओजश्च पुनरौ-
र्जित्यं - - प्रेयः सुशब्दता। समाधिः सौक्ष्म्यगाम्भी-
र्ये संक्षेपो विस्तरस्तथा॥ सांमित्यं भाविकत्वं च

रीतिरुक्तिस्तथैव च। एव--णोद्देशो निर्देशोऽत्र निगद्य-
ते॥ यत्र बन्धोऽतिसंश्लिष्टः श्लेषः कविभिः स्मृतः॥ प्रसि-
द्धार्थपदन्यासात्प्रसाद इति कीर्तितः॥ बन्धो मृदुस्फु-
टोन्मिश्रवर्णजन्मा न सङ्करः॥ भजते यत्र सोद्धृंद
तत्समत्वमुदीर्यते॥ अर्थोचितवचोबन्धो माधुर्यम-
भिधीयते। अकठोराक्षरन्यासः सौकुमार्यमुदाहृतम्॥
द्वितीयतुर्या---र्णां सर्वे चासमयोगिनः। सौकुमा-
र्येण बाध्यन्ते न बिन्दुर्गुरुसंयुतः॥ रेफद्वयसमावे-
तो नै--- क्वचिदिष्यते। नचैकलक्षणन्यासो बहुषु
स्यान्निरन्तरः॥ नादे चोऽपि बहुलो विना चित्र--धनात्।
स्वयं रेफो मृदुः किं तु कठोरयति योगिनम्॥ अन्योन्य-
मृदुसंयोगः स्वल्पो दोषाय --ते। काठिन्यलक्षणं
तत्र हन्तुं युक्त्यापि शक्यते॥ अतिप्रसङ्गदोषस्तु प्रती-
त्यैव निरस्यते। अ--त्वराद्यदान्तः पूर्वमेवावलम्बितः॥
अर्थव्यक्तिं तु विस्रंसः प्राहुः संपूर्णवाक्यताम्।

अन्धस्यो - - - कान्तिः स्फुरणादभिधीयते ॥ वदन्ति ब-
ध्वैकत्वमौदार्यं कविपुंगवाः ॥ श्लाघ्यैर्वि - - - दात्तमिति
तद्विदुः ॥ ओजः समासभूयस्त्वं तद्बन्धापदपद्धतिः । बन्ध-
गाढत्वमौर्जित्यं समासे व्यास - - - ॥ श्रेयोऽर्थपदविन्यासः
श्रेयः कविभिरिष्यते । या सुबन्ततिङन्तानां व्युत्पत्तिः
सा सुशब्दता ॥ समाधि - - गंस्य भवेदन्यत्र रोपणम् ।
सौक्ष्म्यमाहुस्तु शब्दानामन्तः सञ्जल्परूपताम् ॥ ध्वनि-
मत्ता तु गाम्भीर्यमार्यै - - - णः स्मृतः । अभिधानं स-
मासेन संक्षेपः परिकीर्तितः ॥ व्यस्तं विस्तार इत्याहु-
रभिधानविशारदाः । यावदर्थपद - - - संमितत्वं निग-
द्यते ॥ भावाभिव्यञ्जिका वाणी भाविकत्वमुदाहृतम् ॥
उपक्रमस्य निर्वाहो रीतिरित्यभिधीयते ॥ - - न्तरेण
चार्थस्य भणनाद्युक्तिरिष्यते । एतेऽप्यथ गुणास्तज्ज्ञै-
र्गीर्विंशतिरुदाहृताः ॥ एतेषा - - णां ब्रूमस्तत्साङ्के-
तिकम् ... ... तेषु ... ... भिधीयते ॥

यत्र प्रकट एवार्थः सः - - - दो गुणः स्मृतः ॥ अवैषम्यं
क्रमस्थानां समतेति सतां मतिः ॥ क्रोधादावप्यतीव्र-
त्वं माधुर्यमभिधीयते । म - - - पदार्थानां सौकुमार्य-
मुदाहृतम् ॥ अर्थव्यक्तिः पदार्थानां स्वरूपकथनं विदुः ।
उद्दीप्तरसतां कान्तिमामनन्ति - - दः ॥ उदारत्वमिति
प्राहुरुत्कर्षं विभवस्य तु । धीमद्भिराशयोत्कर्ष उदात्तत्वमु-
दीर्यते ॥ प्रारंभेषु च सं - - जस्सु कवयो विदुः ॥ रूढाहं-
कारतौर्जित्यमभङ्गुरमिहोच्यते ॥ श्रेयः प्रियपदार्थाना-
मुपन्यासः प्रमे - - - । पदैरदुष्टैः कथनं इष्टार्थस्य सु-
शब्दता ॥ व्याजेनान्यार्थभजनं समाधिरभिधीयते । सू-
क्ष्मार्थदर्शनं से - - - दाहरन्ति विशारदाः ॥ शास्त्रार्थ-
सव्यपेक्षत्वं गाम्भीर्यमिति कीर्तितम् । बहोरर्थस्य सङ्को-
चः संक्षेप इति कीर्तितः ॥ - - - पुनरर्थस्य विस्तरं तद्विदो
विदुः । अनुरूपगुणारोपः संमितत्वमुदुच्यते ॥ भावयु-
क्तत्वमाचार्यैर्भ - - - मिति स्मृतम् । रीतिमाहुः पदार्थाना-

मप्रसादिक्रियाक्रमम्॥ संवृतासंवृतप्रावराकेरथस्य--
---। दोषाणामपि येषां स्यात् गुणं कारणात्क्वचित्॥
चत्वारिंशत् कुर्वन्ति ते च वैशेषिका --। पदं याति
गुणो भावमनुकर्तुरसाध्वपि॥ यथा न बाधते स्कन्धो य-
था बाधति बाधते। तथा---णदृष्टमनिबद्धनिबन्धनम्॥
श्रुतेरलम्भं कष्टं तन्न दुर्वचकादिषु। अपि क्लिष्टं गुणाये-
ष्टं झटित्यर्थप्रतीतिकम्॥ --नर्थकं न दुष्टं स्याद्यमका--
द्युपयोगि यत्। सद्भिरिष्टमपुष्टार्थं छन्दःसंस्कारकार-
णम्॥ पदान्तरप्रतीति--- गूढार्थमपि सुन्दरम्। अ-
प्रतीतं कृताभ्यासात् गोष्ठीष्वेव गुणावहम्॥ सन्दि-
ग्धं प्रकरणादिविशेषावग-- णम्। यत्तु तथाविधार्थ-
स्य निर्णायामिति दृश्यते॥ प्रहेलिकादिवाक्येषु
नेयार्थमपि शोभते। असमर्थमपि प्रा-- नेष्टं मनी-
षिभिः॥ अप्रयोजकमिच्छन्ति जगादौ तद्धि दोगुणम्।
न्यूनाधिकं तदेवं लोकानिच्छा यथा गुणाः ---ग्राम्य-
(6)
तं गुह्यमपि ग्राम्यं न दुष्यति। संवीतस्य हि लोकेन
न दोषान्वेषणक्षमम्॥ शिवलिङ्गादिशः---- स्यास-
भ्यवस्तुभावना। यद्धि तेषु च शब्दोऽन्यस्तदर्थोऽन्यश्च
कश्चन॥ स्मृतिहेतुत्वदोषं तु वाक्रिमा---धते। निग-
तदूषणं यत्तु तन्नोद्भाव्यं मनीषिभिः॥ किं तु वैदग्ध्य-
भुज्य जठरं व्याधिकोपनात्। अ ----पि संवीतं
गुणमाहुर्मनीषिणः॥ असभ्यस्मृतिहेतोस्तु सिद्धमप्य-
भिधीयते। पात्रावस्थाविशेषेण दो-- मङ्गलं भवेत्॥
अमङ्गलस्मृतेर्हेतुर्गुणो सभ्यस्मृतिर्यथा। धीमन्तोऽ-
पि निबध्नन्ति गौणवृत्त्याधृ--म्। क्वचिदाश्रयसौ-
ष्ठवे शोभामसाध्वपि। कान्ताविलोचनन्यस्तं मली-
मसमिवाञ्जनम्॥ --- वशाविशेषाच्च कुरूपमपि
शोभते। नीलं च पाशाबद्धमन्तरालं स्रजामिव॥
चणार्थं सतिहे--- पूर्ववत्कथिता गतिः॥ गुणत्वं
पददोषाणां दिङ्मात्रेण प्रदर्शितम्॥ इदानीं वाक्यदो-

बाणाऽपि किंचित्तच --- 'शब्दहीनं न दोषाय भा-
षाचित्रेषु कल्पते॥ यत्र संबन्धनिर्ज्ञानहेतुः कोऽपि
कृतो यदि। क्रमभ्रंशाख्यपि त्र -- दोषं सूचयत्तदा॥
न संहितां विवक्ष्यामीत्यसन्धानं पदेषु यत्। तद्विस-
न्धीति निर्दिष्टं न प्रगृह्या --- क्रम॥ अनुकम्पाय-
तिशये यदि कश्चिद्विवक्षते। न दोषः पुनरुक्तेऽ-
पि प्रसृतेयमलं --- ॥ व्याकीर्णं तु न दोषाय प्राक्-
प्रतीतिकरं भवेत्। यदोच्चारणभङ्गः स्यात्संयोगादेर-
--- ॥ --न छन्दो भङ्गमप्याहुस्तदा दोषाय सूरयः
धातुभेदेन दुष्येत स्वरसान्धिकृता - - ॥ नामभेदे-
न शेषेषु न दोष इति तद्विदः॥ दुष्टे पदान्ते शिष्टस्य
पदत्वं निश्चितं यथा॥ तथा सान्धे- - त्वं पदयोर्वाते
जायते। पर्यायेण प्रयोगे वाक्यं प्रश्नोत्तरादिषु॥ सं-
कीर्णं तत्र दोषा- - - । - - - -
- - - - बुधाः॥ रसान्तरगतेरन्यारे तादृशं नेष्यत-

न्यथा' --- भिन्नलिङ्गत्वं यत्रोद्वेगो न धीमताम्॥ न
भिन्नवचनोऽप्येवं दोषमिच्छन्ति कोविदाः। न खञ्ज-
मपि दे---- क्रियापेक्षा न यत्र तु॥ यत्रास्त्यादेरपेक्षा
वा यत्र वा स्फूर्जितं तनैः न्यूनोपमाऽपि प्रायः सुप्र-
सिद्धं न दुष्यति॥-- सर्वेण सारूप्यं नास्ति कस्यचित्।
यथोपपत्तिकृतिभिरुपमानां प्रयुज्यते॥ अखण्डमण्ड-
लः क्वेन्दुः क्व--- ननमद्युति। यत्किंचित्कान्तिसाम्या-
त्तु शशीनैवोपमीयते॥ एवमेवाधिकौपम्ये न दोषं
तद्वि----- । सुकुमारार्थबन्धेषु गौडैः शिथिलमि-
ष्यते॥ अनुप्रासाधिया ते हि बन्धवैदग्ध्यनिस्पृहाः।
--- दिभेदेन यदि वा कविकौशलात्॥ सर्वे क्वचित्क्व-
चिद्दोषा लभन्ते गुणतामयी॥ गणयान्ते न वैषम्यं -
---बरबरः॥ अर्थश्लेषं च गौडाश्चेल्लभन्ते किम-
तः परम्। दीप्तमित्यपरैर्भूम्ना कष्टोरणापि बध्यते॥
शब्दरा --नोतिश्चेन्नापार्थं नैव दुष्यति। अप्रसन्न-

अपि नाम स्यिग्रादालीति निश्चयः॥ पात्रौचित्येन दु-
स्साधा - - - स्थानमपीष्यते। अप्रौढिमपि शंसन्ति शृ-
ङ्गारादिषु तादृशम्॥ रसातिशयसन्धानादनिर्व्यूढं न दो-
ष - - । पूर्वोत्तरार्थसन्धाने निरलंकारमिष्यते॥ रसा-
लंकारपुष्टत्वादृजुमार्गो गुणावहः॥ अथ वाक्या —
- - दोषाणामदोषः प्रतिपाद्यते॥ मत्तोन्मत्तादिवाक्ये-
षु नापार्थमपि दुष्यति। तत्र प्रस्तुतसूक्तार्थां निह- -
- - रसम्॥ तथैव व्यर्थमिच्छन्ति व्यपेतस्मरणाय च।
रसाक्षिप्तधियां वाक्यं नैकार्थमपि दुष्यति। संशया-
यैव सन्दिग्धं यदि जातु प्रयुज्यते। स्यादलंकार एवासौ न
दोष इति मे मतिः॥ अ - - मपि वाक्येषु चित्रहेतौ न दु-
ष्यति। न खिन्नमपि दोषाय यत्र छाया न हीयते॥ इति संभ्रा-
- - -न्तेष्वेतद्विशेषख्यानसंस्कृतम्। कान्तं भवति सर्वस्य
लोकसीमानुपातिनः॥ अत्युक्तिरीति गौडी - - - लौकिका-
र्थव्यतिक्रमे। लोकेतो नाम स्तात्सेनातिमात्रमपीष्यते॥

विरुद्धे लक्षणादौ नु परुषं नैव दुष्यति। - - - मन्दो
षाय यत्रोद्वेगो न धीमताम्॥ तथाधिकौपम्यस्यापि न
दोष इति तद्विदः॥ न दो - - मौपम्यव्यतिरेकोपमादि-
षु॥ कदाचित्कविकौशल्यादप्रसिद्धोपमं गुणः। स्या
दिति प्रतिपत्तेः स्याद्यत्रो - - पमादिषु॥ यत्र स्याद्गुण-
बाहुल्यं रसो वापि परिस्फुटः॥ दोषाय निरलंकारं
तन्न शंसन्ति साधवः॥ महाकविपथा - - लमपि बध्यते।
नास्ति देशविरोधोऽपि दूषणं कविकौशलात्॥ दोषः
काले विरोधेऽपि न कार्यान्तरहेतुकः॥ न च - - रो-
धोऽपि तात्पर्ये दोषमात्रभवेत्॥ तथा युक्तिविरुद्ध-
स्य गुणत्वं क्वचिदिष्यते। क्वाप्यौचित्यविरोधो - -
- - वस्थान्तराद्भवेत्॥ न प्रतिज्ञाविरोधेऽपि दोषो
विधुरचेतसाम्। अस्ति काचिदवस्था सा - - -
गस्य चेतसः॥ यस्यां भवेदभिमता विरुद्धार्थापि
भारती। धर्मशास्त्रविरोधोऽपि - - - न पुण्यचेतसाम्॥

स हि तत्र प्रसिद्धत्वात् परमोत्कर्षकारणम्। तेषां तेजो-
विशेषेण - - - -यो न विद्यते॥ अथ शास्त्रविरोधेऽपि
दोषो नोर्जित भाषणे। कामशास्त्रविरुद्धेऽपि न दो--
- - - - पेक्षया॥ इति चक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रमः।
कलाशास्त्रविरोधोऽपि क्वचिद्दोषाय नेष्यते॥
इति रसार्णवालंकारे गुणोपादानं नाम द्वितीयः

॥ परिच्छेदः ॥

अथोन्माथित दोषस्य न्यस्ताशेष गुण - - । - -
काव्यशरीरस्य चारुतोत्कर्षहेतवे॥ ज्ञेयोऽलंकारयो-
गोऽयं कामिनीवपुषो यथा। - १ - सुन्दरस्यापि सत्कर्षा-
धायको ध्रुवम्॥ निसर्गरम्यलावण्यातिशोधायकता तु यैः।
उक्तालंकारस - - - तेषामतिशयस्तुतिः॥ स्वभावर-
मणीयत्वं विनालंकृतयो वृथा। लोलस्तनतटन्यस्तहारो
द - - नः॥ अलंकारस्तु नारीणां शरीरे त्रिविधाः स्मृ-
ताः॥ बाह्यास्तथान्तराः केचिदुभ - - न्तरा इति॥ तत्र

तारचिता बाह्यमन्यैर्बाह्या इति स्मृताः॥ पृथक्त्वेनाव-
भासन्ते वस्त्रादि - - - दयः॥ स्त्रीयावयवसंस्कारज-
न्मानः पुनरान्तराः। स्वरूपशोभाननकानरवोल्लेखाल-
क - - - ॥ बाह्यैरपि पदार्थैस्तु कृतास्तन्मयतां गताः।
धूपास्यवासप्रमुखा ज्ञेया बाह्यान्तरा इति॥ तथा-
रे - - -रेऽपि भासन्ते बाह्यतोऽपि ये। सर्वेऽपि शब्दा-
लंकारास्ते बाह्या इति कीर्तिताः॥ स्फुरन्त्यर्थविशारा-
द - - - -कृतयस्तु याः। आत्मनान्तः प्रतीतत्वादान्तरा
इति ताः स्मृताः॥ शब्दोत्कर्षं वितन्वानाः शब्दालंकृ-
तयो मताः। अ - - -र्थनिमित्तत्वादर्थालंकृतयः पुनः॥
उभयालंक्रियास्तत्र द्वयालंकारहेतवः॥ जातिरीतिश्च
वृत्तिश्च रचना घटना तथा॥ मुद्रा छाया तथा युक्ति-
र्भणितिः श्राव्यतापि च। श्लेषश्चित्रं तथौचित्यं प्रश्नो-
त्तरप्रहेलिका॥ अनुप्रासोऽथ यमकं मुद्रोक्तिरिति
कीर्तिता शब्दालंकृतयः ~~स्म~~ स्पष्टं अष्टादशामी-

षिब्धाय ॥ संस्कृतप्राकृतादिना तत्र जातिरिति स्मृ-
ता। शुद्धा साधारणी चेति तस्या --- सतम ॥ देशकृ
च्चावचो भासो रीतिरित्यभिधीयते। तत्प्रभेदास्तु स-
र्वज्ञाद्यैः कोऽपकुणोश्वर ॥ ड- - -नयस्तत्र तथापि
प्रस्फुटाकाराः। वैदर्भीगौडपाञ्चाललाटावन्तिसमाग-
या॥ तत्रासमासा वैदर्भी - - - गुणान्विता। साक्षान्नि-
वसतिप्रायो विदर्भेषु जनोभुवः॥ अतोवैदर्भीगर्भा
गीः शृङ्गारस्याङ्गतां गता। - - - हिबालानामपिव-
क्तः परामता॥ यस्यां समासबाहुल्यं वर्णानुप्राससंकु-
लम्। बन्धवैदग्ध्यवन्ध्यासो रीतिर्गौडीति कथ्यते॥
समास्तैर्जायते रीतिः पाञ्चाली पञ्चभिः पदैः सं-
क्षेपगुणहेतुलादियं सर्वजनप्रिया॥ समस्त--गा
लाटी चतुरवल्लभा। हृद्या जातोप लावण्यसंपदाग-
स्पदं परम्॥ आवन्तिका त्वियं रीतिरुक्तलक्षणल-
क्षिता। - - जनैन सुधाबिन्दुस्यान्दैर्जायन्नबध्यते।

(10)

रसोचितार्थसंबद्धपदसन्तानशालिनी। मनोवि-
कासमं --- वर्तनाद्वृत्तिरुच्यते॥ कैशिक्यारभटी
चैव भारती सात्वती तथा। तथा साधारणी चास्या
भेदाः पञ्च प्रपञ्चिताः॥ सुकुमारार्थसन्दर्भनिबद्धा
कैशिकी स्मृता। अत एव हि लास्याङ्गं विबुधैरिय-
- - ते। या श्लक्ष्णनैपथ्यविशेषयुक्ता स्त्रीसंयुता
या बहुगीतनृत्ता। कामोपभोगप्रभ- - -रातां कैशि-
कीं वृत्तिमुदाहरन्ति॥ अतिप्रौढार्थसन्दर्भा वृत्ति-
रारभटी भवेत्। अङ्गं तु - - - वस्याङ्गमङ्गी कुर्वन्ति
कोविदाः॥ यदाह —— प्रस्तावपातप्लुतलङ्घितानि
छेद्यानि मायाकृतमिन्द्रजालम्। - - - - युद्धा-
नि च यत्र वृत्तिं तत्ता दृशीमारभटीं वदन्ति॥ अनति-
प्रौढसन्दर्भा सुकुमारार्थवर्तिनी। महापुरुष- - -
ज्या भारती वृत्तिरिष्यते॥ इयं तु धर्मशृङ्गारगारि-
माञ्चितचेष्टिता। वल्लभा भरताचार्यनाम्ना - - -

-दर्शिता ॥ या वाक्प्रधाना भरतप्रयोज्या स्त्रीवर्जि-
ता संस्कृत ... पाठ्ययुक्ता । सुनामधेयैर्भरतप्रयोज्या
सा भारती नाम भवेत्तु वृत्तिः ॥ नातीव सुकुमारा गौ-
रुदारार्थेषु चेद्भवेत् । इयं तु सात्वती वृत्तिर्यो- - - -
गारशालिनाम् ॥ यदाह — या सात्वतेनेह गुणेन
युक्ता यागेन वृत्तेन समन्विता च । हर्षोत्कटा संहृत-
~ भावा सा सात्वती नाम भवेत्तु वृत्तिः ॥ यथासं-
भवसंभिन्ना यस्यां चतसृणां गुणाः । वृत्तीनां साधु
विज्ञेया वृत्तिः साधारणी बुधैः ॥ सर्वार्थविषया हृद्या
नानामार्गविसारिणी । इयं तु कलिता नाम कवीनां - -
- - सारिणी ॥ यदाह महाभागः — यदाह — ओजः
यत्रारभटादिगुणाः समस्ताः मिश्रत्वमायान्ति मि-
थः प्रथन्ते । कैशिकीतां वृत्तिमुशन्ति धीराः साधा-
रणीमर्थचातुष्टयस्य ॥ यदाह — पञ्चवृत्त्यङ्गसन्ध्यङ्ग-
लक्षणामार्गमान्तरे । व्यालर्णिकाभिरं चे - - - कारत-

चैव न ॥ अर्थानुकूलः शब्दानां निवेशो रचना स्मृता ।
सा तत्स्वरूपपर्यायरचना भवति - - - ॥ उप-
श्लेषः पदार्थानां घटनेति प्रकीर्तिता । प्रस्तुताप्रस्तु-
तातीतपदवाक्यप्रभेदभूः ॥ साभिप्रायसमुल्लासो
मुद्रेति परिकीर्त्यते । उपलक्षणमात्रार्थं शब्दालंकर-
णक्षमः ॥ विभक्तिर्वचनं चैव सं - - समुच्चयः । त-
स्य भेदास्तु चत्वारः कोविदैस्सवर्णिताः ॥ अन्योक्ती-
नामनुकृतिश्छायेति परिकीर्तिता । सा चानन्ता ज-
नानन्त्यात् किंचित्तत्रापि कथ्यते ॥ लौकिकस्त्व-
1 क्तिच्छेक मुग्धवेटोक्तिभेदतः । पञ्चधा - - प्रप-
ञ्चानां परिसंख्या न विद्यते ॥ अर्थानां च पदानां च
योजनं युक्तिरुच्यते । अर्थानां योज - - त्र शोभास्या-
त्पदपध्वतिः ॥ सा पदस्था पदार्थस्था वाक्यवाक्या-
र्थगोचरा । तथा प्रकरणस्था - - - प्रबन्धस्थेति ब-
हुधा ॥ प्रस्तुतार्थप्रकर्षाय वक्तः परिकरो यदि ।

तदासौ फलगेतिनाम्ना शब्दा - --- इष्यते ॥ ततः संभा-
वनेसेका स्यादसंभावनापि च। कल्पना च विरोध-
स्य चतुर्थी फणितिक्रमः ॥ ... ह्लादिनी वाणी श्रव्यता
सापि बाहुधा। आशीर्नाम क्रिया नान्दी वस्तुबीजंप्र-
रोचना ॥ अनेकार्थाभिधा --- नेकार्थपदैर्यदि। व्युत्प-
त्त्या वा भवेदाहुस्तं श्लेषं कविपुङ्गवाः ॥ स प्रकृत्या वि-
भक्त्या च पदेन ---नेन च। भाषया प्रत्ययेनापि बाढ़-
धो विबुधैः स्मृतः ॥ चित्रं तु नियमव्यासो वर्णानामी-
प्सित---- । स्वरवर्णगति स्थानबन्धकारादिबन्ध-
जात् ॥ उपकार्योपकारित्वं यत्र शब्दार्थयोर्भवेत्।
उत्कर्षाधायकं त---- रोचित्वं तत्प्रकीर्तितम् ॥ त-
थाभिधानतत्संबन्धभेदात्ताद्विविधं विदुः ॥ तत्र द्वये-
पि धीशाङ्कविहितः संभ्रमो महान् ॥ ---- यागने-
भेदं कुशाग्रोनधियां तु यः। निकषाय भवेत्तच्च प्र-
श्नोत्तरमिति स्मृतम् ॥ अस्य विश्लेषभेदाना----धेः-

स्ति चेत्स्पृहा। तदा लोकायतग्रन्थं विदग्धमुखमण्डनम् ॥
व्यापकं लक्षणं किं तु किंचिदस्याभि - --। शक्यं
यदनुसारेण सर्वभेदप्रकल्पनम् ॥ अन्तः प्रश्नं बहिः
प्रश्नमुभयप्रश्नमेव च। प्रकृष्टप्रश्नोत्त -- जातिप्रश्नं
च षट्क्रमात् ॥ प्रश्नं प्रहेलिकामाहुः यत्र नोत्तरभा-
षणम्। किं तु वाक्यार्थ एवासौ दुर्बो---ध्यते बुधैः ॥
परिवर्तितविन्यस्तलुप्तव्युत्क्रमबिन्दुकैः ॥ वर्णैः साप-
रथा षष्ठी भवेदर्थप्रहेलिका ॥ ---सु भिन्नार्थी
या वृत्तिः शब्दसन्ततिः ॥ कालेऽनुप्रासे निकर्षं यम-
कं नाम तद्विदुः ॥ अव्यपेतं व्यपेताख्यमप्यपे--
तकम्। नियतानियतस्थानभेदात् षोढा तदुच्यते ॥
द्विरभ्यासत्रिरभ्यासचतुरभ्यासपाठजम्। --
--- सभपञ्चान्यसप्तमं स्यात्समुद्गकम् ॥ एतेषां तु
न कार्त्स्न्येन प्रभेदा वक्तुमीप्सिताः। लक्ष्यलक्षण-
--- र्थै दिङ्मात्रं तु प्रदर्श्यते ॥ उत्तरूपः पदन्यासौ

गूढार्थैः प्रबाधा भवेत्। क्रियाकारकसंबन्धपदा-
भिप्राय--- "अमी च शब्दालंकारा पद्ये गद्ये च को-
विदैः। कार्या सन्दर्भशोभायै यथौचित्यं यथारसम्॥"
इहार्थ--- शिष्टानुशिष्टानामपि सर्वदा। वाचामेव
प्रसादेन लोकयात्रा प्रवर्तते॥ इदमन्धं तमः कृत्स्नं
जा---- भुवनत्रयम्। यदि शब्दाह्वयज्योतिरासंसा-
रान्न दीप्यते॥ जातिस्तदत्र वाग्देव्या मूर्तिस्तज्ञै--
--ता। रीतयस्त्वङ्गसौन्दर्यं लावण्यमथवृत्तयः॥
अलंकारतयाप्यासां कामचारो---। वक्तव्यः
कामचारश्चेद्विशेषापेक्षया भवेत्॥ रचनापटने देव्याः
कुण्डले पारकीर्तिते। दया मुद्रा तु मुद्रैव छायामाल्य-
मुदाहृतम्॥ युक्तिं हारावलीं प्राहुः भणितिं मेखलां
पुनः---- कङ्कणे श्रेणिं लेखमित्रे तु नूपुरे॥ लीला-
कम [illegible]लौचित्यं न्यासः प्रश्नोत्तरं परम्। प्रहेलिका तु
[illegible] न्यासं तु कञ्चुकम्॥ क्रीडाशकुन्तयमकं गू-

ढोक्तिं केलिकन्दुकम्। विजाते गौरवं प्रायः क्वापि--
--- दृश्यते॥ रीतिस्तु पेशलो मार्गः स चेन्नास्ति किं
मास्ति तत्। रचनानाम चातुर्यं तां विना कः कवेर्गु-
णः॥ विना घटनां---- दुर्घटं न विराजते। समुद्रत्वं तु
नाम्नापि गाम्भीर्यगुणदायकम्॥ विच्छायं यत्तु किं
तस्य वार्तयापि मनीषि---।---युक्तिकं तु यद्वाक्यं
तस्य कान्याधिगर्हणा॥ भणितिर्वक्रता सार्थं तु विद-
ग्धजनवल्लभा। अवक्रभणिते--- दर्योऽपि कुला-
ङ्गनाः॥ न भवन्ति विदग्धानां प्रकाशानन्दहेतवः।
अशक्यामिति चेदुक्तं श्रूयते ---- पुनः॥ चित्तसंश्लेष-
स्थितां चित्रैककारणम्। विनयेन विना का श्रीः का नि-
शा शशिना विना॥ विन --- पित्राभ्यां कीदृशी वा-
ग्विदग्धता। अनौचित्यादृते नान्यो[illegible]स्ति तिरस्का-
रस्य चेतसाम्॥ प्रश्नोत्तरं नाम--- गोष्ठीविनोदो
न तज्ज्ञैः [illegible] पटव्यामोहने चापि सोप-

योगा ... हेलिका:॥ लवणेन विना भोज्यं सागेन रहि-
तं धनम्। अनुप्रासविहीनं तु काव्यं को नाभि---॥---
--- तथा वल्लभाश्लेषो न पीयूषरसः प्लुति। यथा भवति
मोदाय मक्लिष्टपदकं वचः॥ गूढगूढचतुर्थादि वा --
----- दर्पशान्तये। यदि वा वल्लभाकेलि गोष्ठीमभर-
सावहम्॥ यथामति यथाशक्ति यथौचित्यं यथारुचि।
कवेः-- स्य चैतासां प्रयोग उपपद्यते॥ यादृग्गद्यवि-
धौ बाणः पद्यबन्धे न तादृशः। प्रतिमार्गमिय---
-- चित्रा हि सरस्वती॥ संस्कृतेनैव कोऽप्यर्थः प्राकृते-
नैव चापरः। पैशाच्यशौर----न्यो मागधोऽन्यो निब-
ध्यते॥ कश्चिद्गद्येन पद्येन कश्चिन्मिश्रेण चापरः। श-
क्यो र --- ग्राम्यां कश्चित्तु पार्थिमिः स्त्रोभिः॥ संस्कृ-
तेनैव केऽप्याहुः प्राकृतेनैव चापरे। साधारणादिभिः
केचित् केचन [illegible] म्लेच्छभाषया॥ न म्लेच्छितव्यं यज्ञादौ
स्त्रीषु नापकृतं पठेत्। सङ्कीर्णं ना --- तेषु नापबुद्धे-

षु संस्कृतम्॥ वदन्ति संस्कृतं देवाः प्राकृतं किन्न-
रादयः। पैशाचाद्यं ~~[illegible]~~ चायाः मागधं हीनजात-
यः॥ के भूपनाम्नराजस्य काले प्राकृतवेदिनः। काले श्री-
साहसां ---- केन संस्कृतभाषिणः॥ नात्यन्तं संस्कृतेनै-
व नात्यन्तं देशभाषया। कथागोष्ठीषु कथयन् लो-
---- बहुमतो भवेत्॥ शृण्वन्ति लटहं लाटाः प्राकृ-
तं संस्कृतद्विषः। अपभ्रंशेन तुष्यन्ति स्वेन ---
गूर्जराः॥ ब्रह्मन्विज्ञापयामि त्वां स्वाधिकारजिहा-
सया। गौडः पठतु वा गाथां ---- स्तु सरस्वती॥
विभाव्यैवं प्रयत्नेन शब्दालङ्कारजातयः। यथा
योगोपयोगाय --- कविपुङ्गवैः॥ एतद्ग्राह्यं सुर-
भि कुसुमं ग्राम्यमेतन्निधेयं धत्ते शोभामिदमिह
पुनस्तै --- न्ति सम्यक्। मालाकारो रचयति यथा
साधु विज्ञाय मालां योज्यं काव्येऽप्यवहितधिया
त --- भिधानम्॥ शब्दालंकारप्रकाशो नाम तृती-
यः परिच्छेदः

अर्थाः कृतयस्त्वन्या अर्थोऽर्कैर्वैकहेतवः॥ सचेतन-
मने ---- सदनन्ताः प्रचक्ष्महे॥ जातिहेतुरहेतुश्च
सूक्ष्मसारसमाहितम्। भावो विभावनान्योन्य ---
---- थो विषमं तथा॥ संभवः प्रत्यनीकं च ~~वर्त्व~~-
----लम्। व्यतिरेकस्त्वसङ्गतिः। तथा लेशाभिधा-
नं च पारिव ---- लनम्॥ वितर्कस्मरणभ्रान्तिरभावश्चा-
गमश्च सः॥ उपमानानुमाने च प्रत्यक्षं चार्थिक ---
---॥ संशयो निश्चयश्चैता अष्टाविंशतिरीरिताः॥
नानावस्तुषु जायन्ते यानि रूपाणि प्रतिपद्यते॥ जह-
मो नमसी वास्ति रूपं सा सार्वकालिकम्॥ स्वरूपमाश्रय-
हेतुमिति त --- दहेतवः॥ ते संस्थानादयस्तेषु सा वि-
शेषेण शोभते। संस्थानमथ ---- व्यापारो वेष इत्य-
पि॥ स्वरूपाणीति शंसन्ति तत्प्रपञ्चः प्रवक्ष्यते। बाल-
वृद्ध वि --- हीनजात्यादिसंश्रयः॥ तिर्यञ्चोऽपीति
तल्लक्ष्यं पिञ्छमात्रेण प्रदर्श्यते। देशकालकलाशक्ति-

---- नानि च हेतवः॥ अमीषामपि लक्ष्याणि य-
थायोगं प्रचक्ष्महे॥ प्रवृत्तेर्वा निवृत्तेर्वा य --- स्या-
न्निबन्धनम्। तत्रास्य हेतुरित्याख्या षट्प्रकारः स
कथ्यते॥ एकः प्रवर्तको हेतुः --- कार्ये निवर्तकः॥
अभावहेतुरपरो ज्ञापकोऽन्यः प्रयोजकः॥ अ---
---- बहुप्रपञ्चस्तु चित्रहेतुरिति स्मृतः॥ क्वापि
पात्रवशावन्ध्यः क्वाप्यर्थान्तरबोधितः॥ ---
ताकारलक्ष्योऽर्थः सूक्ष्मसूक्ष्मगुणस्तु सः। सूक्ष्मा-
त्प्रत्यक्षतो सूक्ष्मः प्रत्यक्ष इति ---॥ स चाभिधीय-
मानस्य प्रतीयमान एव च। सान्निध्यापि द्विधा भि-
न्नो भूत्वा भवति षड्विधः॥ ---- हेतुः स्याद्यः स-
न्नापि कार्यक ---। --- निरासेन सारसङ्ग्रहणे च
सा॥ रस इत्युच्यते सोऽपि धर्मिधर्मात्मना द्विधा।
उप ---- प्रयत्नाद्या कारणं सहकारि यत्॥ आसाद्यते
क्रियारम्भे तादृशेन समाहितम्। अभिप्राया -

---तु प्रवृत्तिर्भाव इष्यते। प्रसिद्धहेतुत्यागेन हेत्वन्तरविभावनम्॥ स्वभावभावनं स्याद---विभावना॥

शब्दतोऽर्थतो वापि द्वयतो वा पदार्थयोः॥ उपकार्योपकारित्वमन्योन्य------ते। मालारूपं यदन्योन्यं मालान्योन्यं तदुच्यते॥ सर्वस्व स्यस्याति-प्रायस्तत्र साक्षा----वी। अन्योन्यभ्रान्तिमप्याहु-रन्योन्यामिह कोविदाः॥ काव्यतस्तूपकारित्वादुपलक्षण---वा। अन्योन्यैकतया प्रायो वैचित्र्यं काव्यवस्तुनः॥ अतस्तामपि नान्योन्यात् पृथगुक्तं पृ- --

---असङ्गतिः पदार्थानामुत्कर्षाधायिनी यदि॥ व-क्रिमाक्रान्तसौन्दर्यः स विरोधोऽभिधीयते।---

---पदविरोधोऽपि कथितः कविपुङ्गवैः॥ नजाकृत-विकारत्वात्स नोक्तः श्लेषलक्षणे।---- शब्दालंकारः संख्यागौरवभीरुणा॥ नमयातत्र युक्तोऽपि पृथक्कृतोपवर्णितः। उप--- गोत्पन्नं कार्यं विषमत्युच्यते ५

प्रयोगः प्रायशस्तस्य सौन्दर्यमवलम्बते। उपनेककार---- दर्शनादिदमीरितम्॥ भविष्यामीति यज्ञानां स संभव इति स्मृतः॥ विधिरूपो निषेधात्मा द्वयात्मा द्वयवर्जितः॥---- र्शनेषु तद्रूपं चतुर्धापि विभाव्यताम्। प्रतिकूलफलोत्पत्तिर्मोसितार्थस्य कारणम्॥ यत्करोति तदाख्य---नीकं मनीषिभिः।

यत्राभिधाय साधर्म्यं वैधर्म्यमपि कथ्यते॥ व्यतिरेकः स विज्ञेयः सप्तधाऽसौ प्रपञ्च्यते।---कामयतिभेदोऽर्थः सदृशासदृशोद्भवः॥ स्वजातिव्यक्तिजन्या च रूपकप्रकृतिस्तथा। कार्यकारण----भिन्नदेशव्यवस्थितिः॥ जायते तत्फलं सा तु स्मृता धीरैरसंगतिः॥ दूषणस्य गुणीभावो दोषीभा---णस्य वा॥ द्वयं वा यत्र संश्लिष्टं तल्लेशं प्रचक्षते। अन्यस्यान्यत्र विन्यासो द्रव्यस्य तु गुणस्य वा॥ यत्र सा--रव्या स्मृतालंकारकारिभिः

ताबाहुर्व्यत्यये नैकाभन्यां विनिमयेन च॥ अन्याश्रुभय-
वाक्यार्थविमिश्रा - - - - । वस्त्वन्तरतिरस्कारो
वस्तुनान्येन चेद्भवेत्॥ निमीलितमिति प्राहुस्तदलं-
कार इष्यते। हितं चाविहितं चैव तद्गुणोऽतद्गुणस्तथा॥
नैतेषां लक्षणं भिन्नं निमीलितमतो यतः॥ संशया-
- - - स्याय ऊहो निर्णयात्मनाम्॥ स वितर्क इति ज्ञे-
ज्ञेयो निर्णयो निर्णयात्मकः॥ सदृशादृष्टचिन्तान्यस्मा-
- - - यते स्मृतिः॥ यानुभूतपदार्थानां स्मरणं तत्र की-
र्तितम्॥ प्रत्यभिज्ञानमप्याहुस्तार्थान्त - - - ते॥
स्मृतिः स्वप्नायितं चान्या तथान्या व्याप्तिवर्जिता। भ्रान्ति-
र्विपर्ययज्ञानमतत्त्वे - - - णी॥ तत्त्वेऽप्यतत्त्वरूपा
वा द्वयं तत् त्रिविधं भवेत्। बाधिताबाधितापूर्वं तथा
कारणबा - - ॥ - - ज्ञानार्था सङ्कुहार्थाकुपेक्षार्था तथेतरा।
काले कतिषयां भ्रान्तिर्भ्रान्तिमालेति कथ्यते॥ - - भ्रा-
न्तेर्न भिन्ना स्यादेतल्लक्षणलक्षणात्। कारणैरपि

चेद्भ्रान्तिरपनेतुं न शक्यते॥ स भ्र - - - तिशयोऽप्यत्र
न भिन्नो भ्रान्तिलक्षणम् - - त्। यत्र वस्तुनि नोल्लेख-
मात्रं ज्ञानस्य विद्यते॥ - - - व्यनध्यवसायाख्या भ्रा-
न्तिरेवेति मे मतिः॥ असत्त्वं तु पदार्थानामभाव इति
कथ्यते॥ - - - प्युत्कर्षमाप्नोति कोऽप्यर्थः कविकौश-
लात्। स भवेत्प्रागभावो वा प्रध्वंसाभाव एव वा॥
असन्ताभा - - वो वा कल्पिताभाव एव वा। आगम-
स्याप्तवचनं दृष्टादृष्टार्थसाधनम्॥ पुरुषार्थप्रभे-
देन - - - र्था स्मृतो बुधैः। धर्मार्थकाममोक्षाणां शा-
स्त्राण्यागम उच्यते॥ आद्यन्तौ ताव - - - दृष्टार्थौ म-
ध्यमौ स्मृतौ। (प्र)वृत्त्यात्मा निवृत्त्यात्मा धर्मोऽयं द्वि-
विधः स्मृतः॥ नानासम्प्र - - - दनदुर्भणस्तस्य वि-
स्तरम्। तथापि ब्रूमहे किंचिन्मार्गमात्रप्रदर्शकम्॥
आर्योक्तिरिति संयोज्य वाक्यं सन्दर्भमर्थतः॥ अ-
र्थस्तु त्रिविधो ज्ञेयः पित्र्यः स्वः सञ्चितो नवः॥ तद्-

पार्जितम्॥ त्राणमर्थागमम् इति स्मृतिः। तत्र विद्यामयी
हेमपशु भाण्डमुपस्करः॥ --- गमिदं पित्र्यमर्थजातं
प्रचक्षते कलत्रपुत्रसहितं दशधान्यमयं पुनः॥
अस्यापि विस्तर --- नं तद्ग्रन्थेष्ववधार्यताम्। आ-
सीन्माहेश्वरं शास्त्रमत्र कोटिप्रमाणकम्॥ पुनस्तद-
पि संक्षिप्तम् --- यंभुवं ततः। वातव्याधेरपि ग्र-
न्थः सप्रपञ्चः प्रवर्तते। बृहस्पतेर्भयं चेद-
मिद --- सम्यतम्। इदं च विष्णुगुप्तस्य तथा
कामन्दकेरपि। कियतोऽन्येऽभिधातव्याः कृता ये-
--- धेरपि॥ अतस्तदर्थजिज्ञासा यदि वः संप्रव-
र्तते। क्षणान्तरं प्रतीक्ष्यं तदन्यस्तावदुपक्र- --
--॥--- पञ्चोपायस्कन्धा नामज्ञानेऽनार्थभाष-
णम्। तेनैषां लक्षणाख्यानमात्रमत्रोपयुज्यते॥ न-
येनार्जनं येन विद्यादेरर्थसंपदः। तेनासौ विनय-
स्कन्धः स्मृतो नीतिविशारदैः॥ --- वाषखानेन्द्र

मवणिग्वृत्त्यादिवार्तया। स्ववृत्तिचिन्तनं येन ना-
ताः स्कन्धः स उच्यते। प्रजाविवादसं-- -यान्या-
नयनिरूपणात्॥ अयं व्यवहृतिस्कन्ध इति त-
ज्ज्ञैरुदाहृतः। कण्टकाक्रान्तसामन्तर- -येनचा-
र्जनम्॥ तेनायमर्थतन्त्रज्ञैरक्षास्कन्ध इति स्मृतः।
हेयोपादेय षाड्गुण्य-- -स्तितमार्जनम्॥ सुसि-
द्धं येन चार्थस्य मन्त्रस्कन्धस्तु तेन सः। सामा-
दिभिरुपायैस्तु ये --- वर्जनं भवेत्॥ उपायस्क-
न्ध इत्युक्तो मन्त्रस्कन्धाद्विभेदितम्। प्रवणादि-
भिरन्येभ्यो येन - - र्जनमिष्यते॥ विश्रमस्कन्ध
इसाख्यामयमालंबते क्रमः। जैत्रमन्त्रादिभिर्यत्र
शास्त्रायुक्ता प्रचोदिते॥ अर्थउपनिषत्स्कन्ध
इति तं च प्रचक्षते। चतुरङ्गेण युद्धेन यत्र विजि-
ता रिपवः॥ --- ते(न) तमाहुर्युद्धस्कन्धं वि-
शारदाः। परोपद्रवसन्त्रासप्रशान्त्या यत्र लभ्यते।

अर्थ --- पिसः प्राज्ञैः प्रशमस्कन्ध उच्यते। अत्र
चैते प्रदर्श्यन्ते यदि तैस्तैर्निदर्शनैः। प्रकृ -- वि-
चारस्य तदा देयो जलाञ्जलिः। उपयोगं विना
किंतु न ह्यप्यर्थो विराजते। उप -- देशैकस्मात्
अर्थस्यास्य प्रचक्ष्महे। क्वचिदेव हि कोऽप्यर्थो
देशे देशे प्रवर्तते। --- तस्योपयोगस्य देश एव
निबन्धनम्। कस्मिन्नपि हि कोऽप्यर्थः काले
येनोपयुज्यते। तेन मन्यामहे कालमुपयोगनि-
बन्धनम्। कार्यत्वे सर्वसामान्ये कार्यं कार्यान्त--
-- कम्। अर्थान्तरानुबन्धित्वात् तत्र कार्यं निबन्ध-
नम्। उपकारादिनानर्थं प्रतिघातो हि दृश्यते।
तत्रा -- प्रतीघात उपयोगनिबन्धनम्। दत्वार्थं
वैरिणां सन्धौ कृते वैरं निवर्तते। -- तो वैरनिवृत्तिः
स्यादुपयोगनिबन्धनम्। अर्थेन वर्तनं यच्च तद्वि-
ख्यातं गृहे गृहे। --- शेन ततो वृत्तिरुपयोगनि-

बन्धनम्। गुणिनोऽपि दरिद्रस्य नादरः प्राकृता-
ज्जनात्। तस्मादर्थोऽपि --- नार्थं भवेन्मानोनिब-
न्धनम्। अपि निर्व्याजवीरस्य न त्यागविरहे यशः।
तत्कीर्तिरेव तत्र स्यादुपयोगनिबन्धनम्। तस्मा-
दर्थार्जनोपायानुपयोगांश्च तत्वतः। यतो जान-
न्ति धीमन्तः से -- र्थागम इष्यते। स्त्रीपुंयोगस्तु
कन्दर्पललितं काम उच्यते। कौकशाभियुक्ते स्त्री-
--- यत्र तद्द्विधा। तयोस्तु मन्मथक्रीडाचातुर्या-
र्जनार्थिनोः। शास्त्रं कामागमो नाम --- यतादि-
कम्। कन्या स्वस्त्री परस्त्री च सामान्येति च यो-
षिताम्। भवन्ति भेदाश्चत्वारः तत्प्रभेदा -- कशः।
तत्र कन्यागतः कामो द्विधा तज्ज्ञैरुदाहृतः। वैवा-
हिको भवत्येको द्वितीयः --- रिकः। स्वस्त्रीरु-
द्धावरुद्धेति द्विधा कामोऽपि तद्गतः। रुद्धारुद्ध-
फलं पूर्वो दृष्टार्थैकफलोऽपरः। रुद्धावरुद्धा

स्वा च परस्त्री त्रिविधा भवेत् । एक एव हि कामः
स्यात्सङ्गत ... रिकः । सामान्यवनिता वे-
श्या कामस्तत्रैक एव हि । धीरैर्निसर्गचा—
-- चतुरास्यप्रकीर्तितः । अस्योदाहरणश्रेणी-
श्शास्त्रं पूर्वोपवर्णितम् । श्लोकमात्रे -- त्रं तथाप्ये-
तत्प्रचक्ष्महे । आत्मनो बन्धनच्छेदादशरीरदशा
स्थितिः । मोक्षः स्यात्तदुपा ... शास्त्रं मोक्षागमः
स्मृतः । यत्र दृष्टार्थसादृश्याददृष्टोऽर्थः प्रतीयते ।
त उपमानमिति -- र्बुधैरलंकारः स कथ्यते । उपमान-
मिति प्रोक्तो बुधैरभिहितोऽपि सः । यतोऽभिनय-
--- सूच्यं वस्तु प्रतीयते । अपतस्तदपि रसज्ञै--
-- नमुदाहृतम् । रूपं शंसन्ति मुद्रापि स्वाभिमे-
तस्य वस्तुनः । उपमानान्न सा भिन्ना भवतीयाह-
--- नः । अविनाभाविना ज्ञानं यत्र लिङ्गेन लि-
ङ्गिनो । ... व्यवहा - मनीषिणाम् ।

इन्द्रियार्थसमायोगात् जातं यदुपजायते । प्रत्य-
क्षं यच्चथा तत्स्या --- च्चकभेदतः । यस्मिन्नासन्त-
सादृश्यात्संदेहो वस्तुनो भवेत् । स संशय
इति प्राज्ञै --- भासोदरस्तु सः । उदीरितमसं-
भाव्यं लोकवृत्तानतिक्रमात् । यदसूक्तिपया-
रव्येयं विज्ञे --- तिशयोऽत्र सः ॥

उपर्यालंकृतयास्त्विमा कविसभासंभावनालि-
प्सुभिर्वाच्याः सम्यगुदारबन्ध -- रैः काव्ये नि-
योज्याः सदा । पीयूषप्रकृतिसुन्दरीरपि परै-
र्लब्ध्वा प्रमोदे - - --- सर्वोऽप्यर्थविशेष-
भावनपरः प्रायो विदग्धो जनः ५

इति रसार्णवे अर्थालंकारनिर्णयो नाम
५ चतुर्थः परिच्छेदः ॥

उक्तः सोयं विभावानुभावसञ्चारिसङ्करः ।
क्रमेण सर्वभावानां शृङ्गारेषु चतुर्ष्वपि ॥

स्थायी च व्यभिचारी च भावो द्विविध उच्यते।
संभोगो विप्रलंभश्च शृङ्गारोऽपि द्विधा मतः॥
समवाये य उद्भूतश्चिरं यश्चावतिष्ठते। भावः
स्थायीति स ज्ञेयोऽव्य -- रीतयोऽन्यथा। उप-
भोग्यालिङ्गनादीनामवधौ यः प्रकाशते। सोऽस्मि-
न्संभोगशृङ्गारो विप्रलंभो विपर्यये। विभावो-
ऽपि द्विधैवात्र लंभनोद्दीपनात्मकः। एकोऽनुभव-
--रे जनकोऽन्यश्च बोधकः। ततः प्रबुद्धे संस्का-
रेऽनुभावो भवेद्द्विधा। अन्तर्बहिश्च भावोत्थ--
--- व्यभिचारिभिः। स्त्रीपुंस्वाद्वेषवर्णानामन्तः
सन्तान दृश्यते। मनोवाग्बुद्धिवपुषां बहिरारंभ-
एव तु। जन्मातिशयसंपर्क-- नुगमानि हि। विभा-
वं चात्र भावं च व्यभिचारी च कुर्वते। विभावान्त-
रा भावानुद्बुद्धोपनानि भावतः। अनुबन्धोऽनुभा-
वेभ्यो नक -- यते। सम्पर्कस्तुल्यता तुल्य-

बलभावान्तरोदये। अनुगामित्वमन्येन स्था-
यिनापन्हवे सति। जन्मानुबन्धातिशया --
-- नुगमात्क्रमेण। भावेषु तल्लक्षणलक्ष्ययोगात्
पञ्चप्रपञ्चाननुपवर्णयामः। सैष भावो रतिर्नाम
काम -- प्राङ्कुरः। सौहृदांकुरकन्दश्च द्वि-
प्रकारोऽपि दर्शितः। भावान्तरेभ्यः सर्वेभ्यो
रतिभावः प्र -- । कविवर्गः समग्रोऽपि
वशेनमनुधावति। निसर्गसंसर्गसुखैः प्रभेदै-
र्जन्मानुबन्ध ---- दिभिश्च। इमा विनि-
श्चित्य निवेशयन्तः कवीन्द्रभावं कवयो लभन्ते॥

५ रतिप्रपञ्चः समाप्तः॥

चतु-- तिरिसेते वा हर्षादयो मया।
उक्ता जन्मादिभेदेन प्रायः संभोगहेतवः॥
अतः परं प्रवक्ष्यन्ते विप्रलंभसमाश्रयाः।
चतुर्विंशतिरुत्कण्ठा चिन्ता स्मृत्यादयोऽपरे॥

ए - - -दयो भावाः शृङ्गारव्यक्तिहेतव ॥

कात्स्न्यादिकोनपञ्चाशद्यथाभेदं प्रकाशिताः।

- - -बन्धातिशयसंपर्कानुगमानिति।

युञ्जीत सर्वभावेषु वर्गयोरुभयोरपि॥

यदपि च गदितं प्रहर्ष - - - निरस्तोरतिवि-

स्मयादिरेव। तदिदमिति निराकृतं प्रकृत्या प्र-

कृतिजभेदमयी हि सर्व एव॥

इति प्रकाशवर्षकृतौ रसार्णवालंकारे

शृङ्गारव्यक्तिः पञ्चमः परिच्छेदः

॥ समाप्तः ॥